## ।। अथ द्विसप्ततमोऽध्याय: ।। Chapter-72

वसिष्ठ उवाच :- शृणु राजन् प्रवक्ष्यामि सर्वसंख्या श्रीमालिकी ।।
यत्र ब्रह्मादयो देवा गंगाद्या: सरितस्तथा: ।। १

प्रभासादी[1]नि तीर्थानि वशिष्ठाद्यास्तपोधना: ।।
सहस्त्रं विघ्नराजानां चौत्रपाला श्चतुर्गुणा: ।। २

चतुरशीतिश्चण्डिका: सहस्त्राणि सरांसि च ।।
एकादश सहस्त्राणि लिंगानां तत्र सन्ति वै ।। ३

एकोनकिंशसाहस्त्रं मुख्यदेवाल[2]या: नृप ।।
अष्टादशं च साहस्त्रं दुर्गाणां तत्र सन्तिवै ।। ४

कूपशाला सहस्त्राणि चत्वारि विविधा मता ।
पण्यविक्रयशालानामष्टसाहस्त्रकं तथा ।। ५

पंचाशत् खलु पंचो[3]न्ना सहस्त्राणि द्विजन्मनाम् ।।
श्रीमाले च श्रिया: पूज्या वसन्ति च निरन्तरम् ।। ६

चतुरशीत्यवटंका: गोत्राणां च चतुर्दश ।।
चतुर्दशगोत्रजा देवास्तुगोत्रे ~~मंत्रे~~ पृथक् पृथक् ।। ७

-०-

१ ए दि
२ ये
३ ए - चाँ

शर्मा देवी शिवो यक्षो गणेशो भैरवो नृप ।।
प्रवरा वेदशाखाश्च गोत्रे गोत्रे पृथक् पृथक् ।। ८

चतुर्वेदाश्च सांगाश्च त्वुपनिषात्संहितास्तथा ।।
सर्वशास्त्राणि वर्तन्ते श्रीमाले श्रीनिकेतने ।। ९

सप्तसाहस्त्रिकी संख्या ऋग्वेदी श्रीनिकेतने ।।
संख्या तु याजुषी तत्र सहस्त्रं द्वादशं नृप ।। १०

सामवेद द्विजानां[2] तु सहस्त्रे द्वे च विंशतिः ।।
चतुःसहस्त्रविप्राणामथर्वेऽपि तत्र वै ।। ११

श्रीमालेऽभ्यागता विप्रा आहूता[3] विष्णुना श्रिया ।।
एतदुत्प्रामाणिकी संख्या तेषामपि वदिता मया ।। १२

त्रिंशद्गोत्राणि[4] वैश्यानां वसन्ति श्रीनिकेतने ।।
दशोनमेकलक्षं हि संख्या चोक्ता पुरा नृप ।। १३

-०-

१ ए मिशब्दो
२ ए द्विजनामां
३ ए हु
४ ए मिशाद्गो

त्रिंशद्गोत्रजा देवी वैश्यानां तत्र सन्ति वै ॥
अष्टसाहस्त्रिकी संख्या चतुः षष्ट्यधिका[१ए] तथा ॥ १४

अष्टादशगोत्रजास्तत्र वसन्ति च धनोत्कटाः ॥
अष्टादश गोत्रदेवी नं कुले च सुखदायिनी ॥ १५

एतत्प्रमाणा श्रीमाले श्रीः गौर्जी वसति नृपे ॥
विप्रगृहप्रमाणेन कृत्वा भागाः श्रिया पुरा ॥ १६

विप्रभागानुसारेण वर्तन्ते श्रीनिकेतनाः ॥
अन्यलोका वसन्त्यत्र तच्छृणु त्वं समासतः ॥ १७

सहस्त्रे द्वे च कंसाराः श्रीमाले च वसन्ति हि ॥
नन्दसाहस्त्रिकी संख्या वसन्ति नगरनायिकाः ॥ १८

चर्मकृलानां तत्रैव सहस्त्रं षट् च त्रिंशकम् ॥
रंगकाः पंचसाहस्त्रं सहस्त्रं पंच सोमपाः ॥ १९

-o-

१ ए चतुष्षष्ठ्याधिका

तत्रप्रजापतीनान्तु वसेत् पंचसहस्त्रकम् ।।
सूत्रधारत्रिसाहस्त्रं सहस्त्रं चौरकारकाः ।। २०

सहस्त्रं रजकानान्तु बनमाली चतुर्गुणाम् ।।
अन्त्यजातिर्वसेत्तत्र श्रीमाले श्रीनिकेतने ।। २१

पंचाशत्सहस्त्राणि वैश्यसंख्यान्यजातिषु ।।
तदर्थं शूद्रसंख्या च ह्यन्यजातिर्वसेन्नृप ।। २२

सप्तलक्षं च सौधानां छिद्राः षणावस्तथा ।।
सार्धकोटिश्च तीर्थानां श्रीमाले श्रीनिकेतने ।। २३

पंचयोजनविस्तारं चतुरस्त्रं समंततः ।।
चतुरशीतिद्वाराणि प्राकारस्तत्र वेष्टितः ।। २४

षोडशैः पुरसंविष्टं पुरं तत्रैव शोभितम् ।।
आसनमेकसाहस्त्रं सभानामुपसेवितम् ।। २५

कथिता स्वल्पसंख्या ते मुख्यमुख्यादिका नृप ।।
एतत्प्रमाणं श्रीमालमुक्तं च मरुस्थले ।। २६

एतन्मया समासेन भूपाल कथितं तव ।।
सार्धकोटिश्चतीर्थानां कः संख्यां वेत्ति तत्वतः ।। २७

श्रीमालमुक्तं चात्रं श्रीदत्तं ब्रह्मक्रमं ।।
यत्रैतद्धृयते नित्यं श्रूयते वा जनाधिप ।। २८

वासस्तत्र न संदेहो देव्याः श्रीविष्णुना सह ।।
देवास्तत्र च श्रीमाले इच्छन्ति वसतिं सदा ।। २९

येषांवासस्तु श्रीमाले मानुषाणां च जायते ।।
मृत्युलोके च धन्यास्ते भवन्ति हि नृपोत्तम ।। ३०

श्रीमालं मानवाः लोके न पश्यान्ति नराधमाः ।।
तेषामीदृशबोधेन ब्रह्मघातको भवेत् ।। ३१

प्राप्ते कलियुगे राजन् श्रीमाले श्रीनिकेतने
गौतमो जैनधर्मं च श्रिताः गोत्रे वदिष्यति ।। ३२

-०-

१ ए त्वद्धृ
२ ए तेषामिहक ज्ञानेन

स्वधर्मं त्याजितो लोको जैनधर्मे चरिष्यति ।।
कलिमागत्य श्रीमाले ज्ञात्वा गच्छे तदाश्रिया: ।। ३३

आगत्य गुर्जरे लक्ष्मी: पट्टक्णो निवसिष्यति ।।
श्रियां गतायां श्रीमालं सर्वं शून्यं भविष्यति ।। ३४

भिन्नमालेति तन्नाम भविष्यति कलौ युगे ।।
एतन्मया समासेन कथितं नृपसत्तम ।। ३५

इदं श्रीमालमाहात्म्यं भक्तियुक्त: श्रृणोति य: ।।
सर्वपापविनिर्मुक्तो विष्णुलोकं गमिष्यति ।। ३६

-०-

इति श्री स्कन्द पुराणे एकाशीति साहस्त्र्यां संहितायां तृतीय परिच्छेदे ब्राह्म विभागे श्रीमाल माहात्म्ये क्षेत्र प्रशंसन नाम द्विसप्ततितमोऽध्याय: ।।